रंशुमतोऽन्तरे MaBhāsk. 6. 45.

**अंशुमालिन्** ( aṁśumāl–in ) *adj.* having a garland of rays or a halo around, encircled with a halo **A** (of the sun) द्रोणोऽग्निकल्पः···रराज··· सूर्य इवांशुमाली MahāBhā. vii. 138. 16; शरैश्चिताङ्गो भुवि भाति कर्णो हतोऽपि सन् सूर्य इवांशुमाली MahāBhā. viii. 68. 37; MahāBhā. viii. App. 2. 54; ततः प्रभृत्यक्रूरः···आदित्य इवांशुमाली चचार ViṣṇuP. iv. 13. 161; तं तडिमाली रविरिवांशुमाली···निजगाद MatsyaP. 138. 49; एवं नाम्नि कृते तस्य भास्करस्यांशुमालिनः । द्विजानां पुरतः पुष्पः कथयामास चेष्टितम् SkandP. vi. 162. 1; कोऽशुमाली पवित्रः VidaMuMa. 3. 12 ( क='the sun'); धार्यधारकभावसंबन्धविवक्षायां यथा अंशुमाली रविरिति भवति KāvyaKaVṛ. 32. 17 (2. 1); **B** (of fire) अरश्मि बिम्बं सूर्यस्य वह्निं चैवांशुमालिनम् । दृष्ट्वैकादशमासात् तु नरो नोर्ध्वं तु जीवति MārkP. 43. 3=SārṅgaP. 4568.

**अंशुमालिन्** ( aṁśumāl–in ) *m.* **1** the sun स···बभौ रणे···यथांऽशुमाली परिवेषवांस्तथा MahāBhā. viii. 60. 19; स ( हनूमान् ) मन्दराग्रस्थ इवांशुमाली··· कुमारमक्षं···ददाह Rāmā. v. 45. 17; मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् Kirātā. 14. 41; 12. 13; अवततार मध्यमं लोकमंशुमाली HarṣaC. 22. 2; हिमालयाभिमुखीं यात्रामदादंशुमाली HarṣaC. 73. 5; ततः···अंशुमाली मलीमसमङ्गमिव क्षालयितुमपरजलनिधिमवातरत् HarṣaC. 293. 18; उत्क्षिप्य त्रियामामयं नीलांशुकपटलमुदजिहीत भगवानुदंशुरंशुमाली AvantiKa. 95. 8; 161. 1; शशाङ्कस्य गुरुतल्पगमनमंशुमालिनो वडवालङ्घनम् DaśKuC. 44. 6; व्रजति विषयमक्ष्णामंशुमाली न यावत् तिमिरमखिलमस्तं तावदेवारुणेन S'iśuVa. 11. 25; क्षुधा··· बभौ दृष्टिरिष्टसमरांशुमालिनः S'ṛṅgāTi.(Ru.) 3. 66; तमसां छेदने कोऽन्यः प्रभवेदंशुमालिनः MahāP. 34. 29; RāmC. 6. 12; 30. 36; लोहितायमाने निपतति मुक्तांशुकेंऽशुमालिनि···किंनरमिथुनमिदमगायत् NalaCam. 3. 21(29); (अर्णवः) अनर्घ्यमर्घ्यं जगदेकचक्षुषे समुद्यतो दातुमिवांशुमालिने NavaSāC. 13. 36; अंशुमानंशुमाली ···दिवाकरः । एतैस्तु नामभिः सूर्यः स्तुतस्तेन NaraP. 20. 5; SaurP. 1. 31; SkandP. iv. 46. 1; तमो न तिष्ठेत संनिधावंशुमालिनः SivaP. iii. 9. 35 (305B. 7); Rāvaṇā. 16. 75; RāmāMañ. 304. 21; स नृपं राहुग्रस्तेंऽशुमालिनि···व्यजिज्ञपत् BṛKathāMañ. xv. 1. 233; अस्ताद्रिकन्दरालीने···अंशुमालिनि KathāSaSāg. iii. 4. 103; xii. 19. 24; तुरगावलिरंशुमालिनः VikraDeC. 15. 65; TriṣaS'aPuC. i. 1. 433; शिरःस्थेनांशुमालिना···अभवत्तेषामुदन्या PāṇḍaC. 9. 251; VasaViKā. 9. 58; रमयति तरुणः पद्मिनीमंशुमाली SūktiMu. 62. 9=S'ārṅgaPa. 3910; कुमुदं मन्दयत्यंशुमाली Ekāva. 6. 3(33); उदितेन···नः प्रशमं महो गमितमंशुमालिना NemiNir. 9. 19; पश्चात् प्रचण्डयो-(i. e. चण्ड and प्रचण्ड)र्दण्डौ पूजयेदंशुमालिनः MahNirvāT. 13. 82; Subhāṣi. 1911; दिवाप्युलूको यदि नावलोकते तदापराधः कथमंशुमालिनः VetāPañ.(S'i.) 25. 34; अंशुमालिनि विशत्यपराद्रिं केचिदस्य किरणाः सविलम्बाः । शार्वरैर्जगृहिरे AcyutaRā. 8. 28; Raghunā. 4. 17; स्नातोत्थितो जलनिधेरयमंशुमाली KaumuMa. 4. 21; असौ···पर्यङ्कात्···प्रोत्तस्थावुदयगिरेरिवांशुमाली AnandRa. 5. 1; VasaTi. 5. 4; 45. 18; AmaK. 206(4); TrikāS'e. i. 3. 18; AnekāSaṁ. 2. 457; अंशोर्धार्यत्वेऽशुमाली स्वत्वेंऽशुपतिरंशुमान् AbhidhāCin. 13; AbhidhāRaMā. 1. 35; AnekāNi. 148; etc. **2** name of a guardian deity at the side-door of a temple औदुम्बरः प्राक्तिको द्वि( वि )रामश्चांशुमाल्यपि । औपदौवारिकं त्वेतद् गणषोडशकं क्रमात् PāraS. 11. 195; **3** sulphur रसोंऽशुमाली जयपाललोहः शिला हरिद्रा वलयं समांशाः···जलोदरादीन् जयतीह रोगान् RaseCin. 9. 211.

**अंशुमालिनी** ( aṁśumāl–inī ) *f.* **1** name of a queen of Ayodhyā अंशुमानभवद्राजा साकेतनगरोद्भवः···तत्प्रिया चांशुमालिनी BṛKathāK. 134. 2; **2** name of the fifth kalā (a part of the Īśānamantra) to be used in Nyāsa अंशुमालिन्यथ परा प्रणवाद्या नमोऽन्विताः S'āraTi. 18. 63; **3** name of a S'akti or personified energy of a deity पूज्यास्ताः···वृद्धि(:) सौम्या मरीचिश्च परतस्त्वंशुमालिनी TantrRā. 7. 19.

**अंशुमालिमण्डल** ( aṁśumāli–maṇḍala ) *n. m.* the disc or orb of the sun पूर्वाचलस्थलीमधिरोहति अंशुमालिमण्डले···सा समुत्थाय सवितुः स्तुतिमकरोत् NalaCam. 3. 3(3)

**अंशुमालिमरीचि** ( aṁśumāli–marīci ) *m.* the ray of the sun, sunbeam यथांशुमालिमरीचिपटलस्य जलच्छायापत्त्याभेदेन तत्प्रकाशात्मता तद्वत् ( आत्मनः प्रकाशात्मता ) SiddhāSi. i. 119. 1.

**अंशुमालिसुत** ( aṁśumāli–suta ) *m.* the son of the sun (Sugrīva) इयमंशुमालिसुत रत्नवती जगती न कुत्र सुकृती यदयम् RāmC. 26. 43.

**अंशुमाली** ( aṁśumālī ) *f.* name of the wife of Kaśyapa कीर्तिर्जयन्तं भर्तारमंशुमाली च कश्यपम् ( सिषेवे ) PadmP. v. 12. 25.

**अंशुयष्टि** ( aṁśu–yaṣṭi ) *f.* a pencil of rays, a streak of rays or light ताडयंस्तिमिरमंशुयष्टिभिः···। मीनकेतनमहीपतेः प्रतीहारतामनुजहार चन्द्रमाः Surath. 6. 54.

**अंशुयोग** ( aṁśu–yoga ) *m.* conjunction of the rays (of the opposing planets) युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम् SūrySi. 7. 18.

**अंशुरहित** ( aṁśu–rahita ) *adj.* devoid of rays रविरंशुरहितो न शोभते SamyaKau. 70. 5.

**अंशुराशि** ( aṁśu–rāśi ) *m.* mass of rays विलुप्यमानातनुकण्ठमण्डलप्रभान्धकारच्छविरंशुराशिभिः । ···समाधिगोचरं चिराय दध्यौ किमपीन्दुशेखरः HarVi. 21. 26.

**अंशुरेखा** ( aṁśu–rekhā ) *f.* a streak or beam of rays चकाशे···पत्युर्भासां भास्वरेवांशुरेखा S'ivLī. 13. 14.

[1]**अंशुल** ( aṁśu–la ) *adj.* radiant, luminous यत्र···। जगाम जम्बालकुलानुकारं रथ्यासु रत्नप्रकरोंऽशुलोऽपि RāmC. 17. 14.

[2]**अंशुल** ( aṁśula ) *m.* name of Cāṇakya विष्णुगुप्तस्तु कौण्डिण्यश्चाणक्यो द्रोमिणोंऽशुलः TrikāS'e. ii. 7. 22.

**अंशुलता** ( aṁśu–latā ) *f.* creeper-like ray अशिशिरमहसो विसारिणा खे वलयितमंशुलताकदम्बकेन NavaSāC. 3. 48.

**अंशुलेखा** ( aṁśu–lekhā ) *f.* a streak of ray or lustre पादाभरणरत्नांशुलेखासंदेहदायिनीभिः···अङ्गुलिभिरुपेताभ्यां···चरणाभ्यां Kād. 186. 22; आयतारुणां··· हारनायकस्यांशुलेखां विभ्रमपताकामिव···उद्वहन्तीं कन्यकामद्राक्षम् TilaMañ. 160.15; अत्यच्छदशनोद्गच्छदंशुलेखातरङ्गिभिः । दीर्घैर्यस्यारिनारीणां निःश्वासैश्चामरायितम् NavaSāC. 11. 79.

**अंशुलेपिन्** ( aṁśu–lepin ) *adj.* smearing with the rays, radiant यत्र···। जगाम जम्बालकुलानुकारं रथ्यासु रत्नप्रकरोंऽशुलोऽपि [ v. l. अंशुलेपी ] RāmC. 17. 14.

**अंशुवत्** ( aṁśu–vat ) *ind.* **1** like a minute particle नन्वदृष्टोंऽशुवत् [v. l. न च दृष्टोंऽशुवत् ] सोऽर्थो न च तत्कार्यमीक्ष्यते PramāVā. 4. 161; **2** as in the case of the Aṁśu libation अहरङ्गं वांशुवच्चोदनाभावात् MīmāSū. x. 6. 38; **3** like the sun कुले भात्येष खेंऽशुवत् KāvyKaVṛ. 107. 19(4. 1)

**अंशुवाण** ( aṁśu–vāṇa ) *m.* ( =aṁśu–bāṇa ) (APTE. GOLD.)

**अंशुवाहिनी** ( aṁśu–vāhinī ) *f.* name of a river कम्पना च विशल्या च करतोयांशुवाहिनी । एताः···नद्यः ViṣṇuDhaP. ii. 22. 181.

**अंशुविभाग** ( aṁśu–vibhāga ) *m.* the separation of fibres or threads अंशुविभागादंशुसंयोगविनाशः NyāyKa. 163. 24.

**अंशुविमर्द** ( aṁśu–vimarda ) *m.* ray-obscuration of two (opposing) heavenly bodies in conjunction अंशुविरोधे [ v. l. °विमर्दे ] युद्धानि भूभृताम् BṛSaṁ. 17. 5; युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम् SūrySi. 7. 18.

**अंशुविरोध** ( aṁśu–virodha ) *m.* ray obscuration of planets अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षुदवमर्दाः BṛSaṁ. 17. 5.

**अंशुविसर** ( aṁśu–visara ) *m.* flow or expanse of light (of the eyes) देव्यपि श्रीः···चक्षुषः क्षरता क्षीरधवलेनांशुविसरेण सुधारसेनेवाप्याययन्ती···राज्ञो वपुः पुनरवादीत् TilaMañ. 56. 6.

**अंशुवृन्द** ( aṁśu–vṛnda ) *n.* a mass or volume of rays **A** of the sun देशे···यात्येकान्तेन नाशं तिमिरवति रवेरंशुवृन्दं खगौघैः PadmP.(Ra.) 25. 59; **B** of the goddess (Pārvatī) सिन्दूराभैः सुन्दरैरंशुवृन्दैर्लाक्षालक्ष्म्यां मज्जयन्तीं जगन्ति । हेरम्बाम्ब त्वां हृदा लम्बते यस्तस्मै विशः स्वयमेवानमन्ते TripuVePāSt. 78.

**अंशुशटा** ( aṁśu–śaṭā ) *f.* ( =aṁśusaṭā ) BṛSaṁ. 27. 1.

**अंशुश्री** ( aṁśu–śrī ) *f.* splendour of rays क्षोणीभृतां कटकवर्मनि किं नु कृत्यमंशुश्रिया विरहितैर्ननु गण्डशैलैः HarVi. 11. 66.

**अंशुश्रेणी** ( aṁśu–śreṇī ) *f.* a row or line of fibres प्रकाण्डश्रीर्वाचामपि न विषयः शाल्मलितरोस्तथाप्यंशुश्रेणीमयमनुपभोग्यं बत फलम् SaduktiKa. 265. 9.

**अंशुसंयोग** ( aṁśu–saṁyoga ) *m.* conjunction of fibres in a thread or yarn ततो विभागात् तन्त्वारम्भकस्यांशुसंयोगस्य विनाशः NyāyKa. 163. 9; 163. 24; अंशुसंयोगविनाशसमकालं तन्त्वन्तरे कर्मचिन्तनात् Kiraṇā. 230. 12 (BSS.); 244. 8(BSS.); अंशुसंयोगनाशात्तन्तुनाशः Kiraṇā. 230. 15 (BSS.) = TarkSaṁ.(Ā.) 75. 18.

**अंशुसंहति** ( aṁśu–saṁhati ) *f.* a mass of rays पार्थबाणाः पशुपतेरावस्रुविशिखावलीम् । पयोमुच इवारन्ध्राः सावित्रीमंशुसंहतिम् Kirātā. 15. 40.

**अंशुसङ्ग** ( aṁśu–saṅga ) *m.* contact with the rays हिमाचले भानुमतोंऽशुसङ्गाज्जलत्वमभ्येति पुनस्तदेव (=अम्बु हिमस्वरूपम्) ViṣṇuP. v. 9. 30.

**अंशुसंघ** ( aṁśu–saṅgha ) *m.* a mass of rays निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसङ्घः NaiṣC. 6. 7; उष्णांशोरंशुसङ्घप्रभावात्स्वल्पं तेजो दीपवन्नाशमेति SiddhāTaVi. 207. 10.

**अंशुसंज्ञक** ( aṁśu–sañjñaka ) *adj.* (a sacrifice) having the name Aṁśu तस्मात्कर्मान्तरं··· अंशुसंज्ञकं यागं करोतीत्येवं प्राप्तम् S'ābaBh. 609. 6 (*on* ii. 3. 20); MīmāKau. ii. 61. 23 (*on* ii. 3. 20)